# सिद्धान्तरत्नम्

श्रीबलदेवविद्याभूषणविरचितम्

The *Siddhānta-ratna*

(“The Jewel of Conclusion”)

of

Baladeva Vidyābhūṣaṇa

November 21, 2005

# Contents

1 परमपुमर्थोपायनिर्णयः 1

# Chapter 1

# परमपुमर्थोपायनिर्णयः

वेदास्तथा स्मृतिगिरो यमचिन्त्यशक्तिं
सृष्टिस्थितिप्रलयकारणमामनन्ति।
तं श्यामसुन्दरमविक्रियमात्ममूर्तिं
सर्वेश्वरं प्रणतिमात्रवशं भजामः॥ १॥

गजपतिरनुकम्पासम्पदा यस्य सद्यः
समजनि निरवद्यः सान्द्रमानन्दमृच्छन्।
निवसतु मम तस्मिन् कृष्णचैतन्यरूपे
मतिरतिमधुरिम्णा दीप्यमाने मुरारौ॥ २॥

देवाभ्यर्थनमन्दरेण मथिताद्भक्तीन्दिराऽभूद्यतः
श्रीमद्भागवताख्यनिर्जरतरुः सत्सूत्ररत्नोत्करः।
दीव्यद्गीतिसुधांशुकामृतरुचिर्ज्ञानं च धन्वन्तरिः
स श्रीव्यासमहाम्बुधिर्विजयते प्रीत्यै समन्तात् सताम्॥ ३॥

गोविन्दाभिधमिन्दिराश्रितपदं हस्तस्थरत्नादिवत्
तत्त्वं तत्त्वविदुत्तमौ क्षितितले यौ दर्शयाञ्चक्रतुः।
मायावादमहान्धकारपटलीसत्पुष्पवन्तौ सदा
तौ श्रीरूपसनातनौ विरचिताश्चर्यौ सुवर्यौ स्तुमः॥ ४॥

इह हि सुखदुःखप्राप्तिपरिहारयोर्लोकप्रवृत्तिर्दृश्यते। तौ चोपेयभूतावुपायमन्तरा न सम्भवेताम्। अतः सारासारविचारज्ञा महर्षयस्तत्रोपायं प्रकीर्तयन्ति। तत्र प्रकृतिपुरुषा-

विवेकादस्य त्रिविधदुःखोत्पादः तद्विवेकात्पुनरनाद्यविवेकनिवृत्तौ पुरुषं प्रति निवृत्ताधिकारा प्रकृतिर्भवतीति तस्य त्रिविधस्य दुःखस्य प्रध्वंसः स्यात्। स च कार्योऽपि नित्यः अभावरूपत्वात्। स एवानन्दावाप्तिरित्युपचरितः भारापगमे सुखी संवृत्त इतिवत्, न तु तस्मात्साऽतिरिच्यत् इति कपिलः॥ ५॥

प्रकृतिपुरुषविवेकाभ्यासवैराग्यपरिपाकाद्यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसंप्रज्ञातसमाधिपूर्वकात्परमेश्वरप्रसादजात्पञ्चविधचित्तवृत्तिनिरोधादेव धर्ममेघशब्दवाच्यादसंप्रज्ञातसमाधेरस्य ताविति पतञ्जलिः॥ ६॥

देहेन्द्रियादिविलक्षणो विभुरयमात्मा नवविशेषगुणाश्रयस्तस्य द्रव्यगुणकर्मसामान्यविशेषसमवायानां साधर्म्यवैधर्म्याभ्यां तत्त्वज्ञानेन साक्षात्कारादीश्वरोपासनासहितान्नवानां वैशेषिकगुणानां प्रागभावासहवृत्तिर्ध्वंसो भवेत्, स एवानन्दावाप्तिरिति कणादः॥ ७॥

प्रमाणप्रमेयादिषोडशपदार्थानाम् उद्देशलक्षणपरीक्षाभिरात्मादिद्वादशविधप्रमेयनिष्कर्षेणात्मसाक्षात्कारात् श्रवणमनननिदिध्यासनपूर्वकात् सवासनमिथ्याज्ञाननिवृत्तौ तत्कार्याणां रागद्वेषमोहानां निवृत्तिस्ततस्तत्कार्ययोः प्रवृत्तिपूर्वकयोर्धर्माधर्मयोस्ततः पूर्वार्जितकर्मणां कार्यव्यूहपूर्वकं भोगेन परिक्षयाद्देहान्तरानारम्भस्ततो बाधनालक्षणस्यैकविंशतिविधस्य दुःखस्यात्यन्तिकी निवृत्तिर्भवेत्, सैव सुखावाप्तिरिति गौतमः॥ ८॥

वेदोक्तैः शुभकर्मभिर्दुःखहानिः सुखलाभश्चेति जैमिनिः॥ ९॥

सर्वे ह्येते उपायास्तयोरात्यन्तिकयोः सिद्धये नाङ्गीकार्याः परमाचार्येण भगवता श्रीबादरायणेन तत्तन्मतानां निराकृतत्वात्॥ १०॥

किन्तु सर्वेश्वराभिख्यस्य पुरुषोत्तमस्य स्वरूपतो गुणतश्च परिज्ञानं स्वज्ञानपूर्वकं तस्यै कल्पते।

तथा हि —

ज्ञात्वा देवं सर्वपाशापहानिः
क्षीणैः क्लेशैः जन्ममृत्युप्रहाणिः।
तस्याभिध्यानात्तृतीयं देहभेदे
विश्वैश्वर्यं केवलमाप्तकामः॥ (श्वे. उ. १.११)

यदा तत्त्वेन तु ब्रह्मतत्त्वं
दीपोपमेनेह युक्तः प्रपश्येत्।
अजं ध्रुवं सर्वतत्त्वैर्विशुद्धं

ज्ञात्वा देवं मुच्यते सर्वपाशैः॥ (श्वे. उ. १.१५)

इत्यादिश्रवणात् ॥ ११॥

ननु किं तस्य पुरुषोत्तमस्य स्वरूपं के तस्य गुणाः कीदृशाश्च ते यद्विभानाद्विमुक्तिरिति चेत्। उच्यते विज्ञानानन्दस्तस्य स्वरूपं विज्ञानमानन्दं ब्रह्म रातिर्दातुः परायणम् (बृ. आ. उ. ३.९.२८.७), आनन्दो ब्रह्मेति व्यजानात् (तैत्. उ. ३.५), रसो वै सः (तैत्. उ. २.७) इत्यादिश्रवणात्। तदेव विग्रहरूपमिति मन्तव्यम्। न तु स्वरूपाद्विग्रहस्यातिरेकः। यदात्मको भगवांस्तदात्मिका व्यक्तिः। किमात्मको भगवान्? ज्ञानात्मक ऐश्वर्यात्मकः शक्त्यात्मकश्चेति। बुद्धिमनोऽङ्गप्रत्यङ्गवतो भगवतो लक्ष्यामहे बुद्धिमान्मनोवानङ्गप्रत्यङ्गवानिति तमेकं गोविन्दं सच्चिदानन्दविग्रहम् () इत्यर्द्धमात्रात्मको रामो ब्रह्मानन्दैकविग्रहः () इति चैवमादिश्रवणात्, वेदान्ते प्रथितं तेजः () इत्यादिस्मृतेश्च। इत्थञ्च सत्यमेव जडं भगवद्रूपमितिज्ञानमेवाचेतनं तदिति च प्रत्युक्तम्। तदेवं भगवद्विग्रहस्यैव ब्रह्मत्वात्तस्य वैष्णवादिवाक्याद्यदन्यथा प्रत्ययनं तत्त्वासुरान् प्रति माययैव

राजन् परस्य तनुभृज्जननाप्ययेहा
मायाविडम्बनमवेहि यथा नटस्य। (भा. ११.३१.११)

इत्यादिकादेकादशादिवाक्यादेव॥ १२॥

ज्ञानानन्दविग्रहता तु तस्य श्रुतिमात्रेण गम्या न तु तर्कैः, अचिन्त्यालौकिकवस्तुत्वात्। तदिदमभिहितं भगवता सूत्रकारेण — अरूपवदेव हि तत्प्रधानत्वात् (ब्र. सू. ३.२.१४), प्रकाशवच्चावैयर्थ्यम् (ब्र. सू. ३.२.१५), आह च तन्मात्रम् (ब्र. सू. ३.२.१६), दर्शयति चाथो अपि स्मर्य्यते (ब्र. सू. ३.२.१७) इत्यस्मिन्नधिकरणे तथैव भाषितञ्च॥ १३॥

परमात्मजिज्ञासोस्तु तर्कोऽनुपादेय एव, नैषा तर्केण मतिरापनेया प्रोक्ताऽन्येनैव सुज्ञानाय प्रेष्ठ (क. उ. १.२.९), अचिन्त्याः खलु ये भावा न तांस्तर्केण योजयेत् (म. भा.) इत्यादिश्रुतिस्मृतिभ्यः। ननु मन्तव्य इति तर्काभ्युपगमः। सत्यम्। वेदान्तार्थानुगुणोऽसौ न निवार्यते। पूर्वोत्तराविरोधेन कोऽत्रार्थोऽभिमतो भवेदित्याद्यमूहनं तर्कः। शुष्कतर्कं तु वर्जयेदित्यादिस्मृतेः। तदेवं विज्ञानानन्दविग्रहानतिरेकि तस्य स्वरूपमितिसिद्धम्॥ १४॥

गुणाश्च सत्यकामत्वसत्यसङ्कल्पत्वादयो ज्ञानानन्दादयश्चानन्ताः, तेऽपि स्वरूपान्नाति-

रिच्यन्ते, एष आत्माऽपहतपाप्मा विजरो विमृत्युर्विशोको विजिघत्सोऽपिपासः सत्यकामः सत्यसङ्कल्प इत्य्, यः सर्वज्ञः सर्वविद्यस्य ज्ञानमयं तप इति, आनन्दं ब्रह्मणो विद्वानिति चैवमादिश्रवणात्। यथोदकं दुर्गे वृष्टं पर्वतेषु विधावति। एवं धर्मान् पृथक् पश्यंस्तानेवानुविधावति। ब्रह्मणस्तद्गुणानां च भेददर्श्यधमं तमः। भेदाभेदप्रदर्शी तु मध्यमं तु तमो व्रजेत् (क. उ. २.४.१४) इत्यादिषु गुणातिरेकदर्शिनो विगर्हितत्वश्रवणात्। अतएव नेह नानास्ति किञ्चन इति तदन्यत्प्रतिषिद्धम्॥ १५॥

ज्ञानशक्तिबलैश्वर्यवीर्यतेजांस्यशेषतः।
भगवच्छब्दवाच्यानि विना हेयैर्गुणादिभिः॥ (वि. पु.)

इत्यत्र धर्माणामपि धर्मिशब्दवाच्यता स्मृता। अनन्तकल्याणगुणात्मकोऽसौ स्वशक्तिलेशाद्धृतभूतसर्गः।

गुणात्मकस्तेऽपि गुणान् विमातुं हितावतीर्णस्य क ईशिरेऽस्य॥ (भा. १०.१४.७)

इत्यादिषु च धर्मिणो धर्मानतिरेकः स्मर्यते। एवमभेदेऽपि भेदव्यपदेशो जलकल्लोलवद्द्रष्टव्यः। तदिदमभिहितं भगवता सूत्रकारेण — उभयव्यपदेशात्त्वहिकुण्डलवत् (ब्र. सू. ३.२.२८)इत्यस्मिन्नधिकरणे॥ १६॥

ननु सच्चिदानन्दविग्रहानतिरेकि भगवतः स्वरूपं ज्ञानानन्दादयो गुणाश्च तस्मान्नातिरिच्यन्ते इति स्वरूपतो गुणतश्च निर्भिन्नं तत्त्वमिति नोपयुक्तम्। सच्चिदानन्दशब्दानां प्रवृत्तिनिमित्तभेदेन तद्वाच्यानां सच्चिदानन्दानां भेदस्यावश्यकत्वादिति चेत्। मन्दमेतत्। अचिन्त्येऽलौकिकेऽर्थे युक्तेरनवतारात्। परमं तत्त्वं खलु तर्कगोचरं न भवति — नैषा तर्केणेत्यादिश्रुतिभ्यः, किन्तु श्रुत्येकगम्यमेव तत्, यथाह भगवान् सूत्रकारः श्रुतेस्तु शब्दमूलत्वात् (ब्र. सू. २.१.२७) इति॥ १७॥

स्वगतभेदोऽपि तत्र नेत्यभिप्रेत्याह श्रुतिः नेह नानास्ति किञ्चनेति। स्मृतिश्च निर्दोषपूर्णगुणविग्रह आत्मतन्त्रो निश्चेतनात्मकशरीरगुणैश्च हीनः। आनन्दमात्रकरपादमुखोदरादिः सर्वत्र च स्वगतभेदविवर्जितात्मा (ना. पञ्च.) इति। तथापि वैदूर्यवदविचिन्त्येन विशेषमहिम्ना तैः शब्दैर्व्यवहारो विदुषामपि निर्बाधः। न चैवं भेदाभेदौ स्यातां निषेधकवाक्यव्याकोपात्। तस्मादविचिन्त्यतैव शरणमिति सन्तोष्टव्यम्॥ १८॥

विशेषस्त्ववश्यं स्वीकार्यः। स च भेदप्रतिनिधिर्भेदाभावेऽपि भेदकार्यस्य धर्मधर्मिभावव्यवहारस्य सत्यादिशब्दापर्यायतायाश्च निर्वर्तकः, इतरथा सत्ता सती भेदो भिन्नः कालः सर्वदाऽस्ति देशः सर्वत्रेत्यबाधितव्यवहारानुपपत्तिः। परेषामप्यावश्यकस्तत्स्वीकारः।

इतरथा विज्ञानमानन्दं ब्रह्म, सत्यं ज्ञानमनन्तं ब्रह्म (तै. उ. २.७) इत्यादिषु स्वरूप-मात्रबोधकानां ज्ञानादिशब्दानां पर्यायतापत्तिः। भ्रमाधिष्ठानत्वादिना चैतन्यस्य सर्वदा भानेऽपि तदभिन्नानन्दादेरिदानीमप्रकाशानुपपत्तिश्च। स्वभावस्तु विशेषात्मा॥ १९॥

न च विज्ञानत्वादिधर्मविशिष्टाभिधायिभिर्विज्ञानादिशब्दैर्विशिष्टमभिधेयं, शुद्धमखण्डं तु लक्ष्यमिति वाच्यम्। सर्वशब्दानभिधेयस्य तस्य लक्ष्यत्वायोगात्। तथापि तत्त्वमसीत्यत्र शोधितात्पदार्थाद्वाक्यार्थस्यैक्यस्य भेदो भेदाभेदो वा नाभिमतः। तथा सत्यैक्यस्य मि-थ्यात्वाद्यापत्तेः। तत्र चेद्विशषो न स्यात्तर्हि कथं स्वप्रकाशचित्प्रकाशेऽप्यैक्यस्याप्रकाशः। चित्प्रकाशस्य भेदभ्रमविरोधितत्वेऽपि तदभिन्नैक्यप्रकाशस्य तद्विरोधश्चेति तस्मादवश्या-भ्युपेयो विशेषः॥ २०॥

स च वस्त्वभिन्नः स्वनिर्वाहकश्चेति नानवस्था। तस्य तथात्वञ्च धर्मिग्राहकप्रमाणसिद्धम्॥ २१॥

ननु जीवत्वेश्वरत्वादिव्यवहारोऽपि विशेषादेवास्तु। मैवम्। यत्र भेदाभावो भेदकार्यं च प्रमिते तत्रैव भेदप्रतिनिधिविशेषः कल्प्यते न तु प्रमितभेदेषु प्रकृतिजीवेषु। न हि सोमवल्लीलाभे पूतिकस्तत्प्रतिनिधिः कल्पनीयः, तस्मान्निर्भेदेऽपि तत्त्वे भेदव्यवहारो विशेषबलादिति सिद्धिम्॥ २२॥

अत्राहुः विग्रहो गुणाश्च स्वरूपादतिरिच्यन्ते इतरथा यदात्मको भगवंस्तदात्मिका व्य-क्तिः, आनन्दं ब्रह्मणो विद्वान् (तैत्. उ. २.६.१) इत्यादिश्रुतेः मम देहे गुडाकेश (भ. गी.) हरेर्गुणाक्षिप्तमतिरित्यादिस्मृतेश्च स्वारस्यभङ्गः। न च विग्रहादेरपि ज्ञानादिरूपत्वं निष्प्रयोजनं प्रमाणेन प्रयोजनमुखानिरीक्षणात्॥ २३॥

विशेषेण स्वरूपेण सह तस्य सम्बन्धो नित्योऽपृथक्सिद्धविशेषणत्वात्। नित्यसम्बन्धा-पेक्षीणयेव स्वरूपानतिरेकित्ववचांसि॥ २४॥

न च विशेष्यविशेषणयोर्ज्ञानादिरूपत्वे नित्यसम्बन्धे च स्वीकृते भेदानुपपत्तिर्विशेष्य-त्वविशेषणत्वाभ्यां तयोर्भेदात्। एकं ज्ञानादिमत् परन्तु ज्ञानादिरुपमिति। इतरथा जीवेशयोरभेदापत्तिः॥ २५॥

यथोदकं दुर्गे वृष्टम् (क. उ. ४.१४.) इत्याद्या श्रुतिस्तु पृथक्सिद्धिवादिनं निन्दति। तस्मात् स्वरूपाद्विग्रहस्य गुणानां च भेद एवेति॥ २६॥

नैतदतिचारु यदित्यादिश्रुतिस्मृतिस्वारस्यभङ्गात्। श्रुतेस्तु शब्दमूलत्वात् (ब्र. सू. २.१.२७) इति हि नः स्थितिरिति॥ २७॥

सगुणवादिवाक्यानां गुणानुवादित्वेन गुणविधाने तात्पर्याभावान्निर्गुणं चैतन्यमेव पारमार्थिकं न तु सगुणं ब्रह्मेति दुरुक्तिस्तूपरिष्टान्निराकरिष्यते॥ २८॥

तथा च विग्रहादेः स्वरूपानतिरेकेऽपि विशेषादेव भेदव्यवहारः। प्रवृत्तिनिमित्तभेदादर्थभेदस्तु लौकिकोऽस्माभिः स्वीकृतः। न त्वलौकिके श्रुतिमात्रगोचरे परस्मिंस्तत्त्वे स स्वीकर्तुं शक्यते॥ २९॥

तदेवं तथाभूतस्य भगवतो ज्ञानादेवास्य जीवस्य तयोरात्यन्तिकयोः सिद्धिर्न त्वन्यस्मादिति सिध्यति, तमेव विदित्वा अतिमृतुमेति नान्यः पन्था विद्यते अयनाय (श्वे. उ. ३.८) इति श्रवणात्, विद्यैव तु तन्निर्धारणात् (ब्र. सू. ३.३.४७) इति न्यायाच्च, प्लवा ह्येते अदृढा यज्ञरूपाः (मुण्ड. उ. १.२.७) नास्त्यकृतः कृतेन (मुण्ड. उ. १.२.१२) न कर्मणा न प्रजया धनेन त्यागेनैकेऽमृतत्वमानशुः (महानारा. उ. १०) यथाऽदृढैः कर्ममयैः क्रतुभिर्नामनौनिभैः विद्यामान्वीक्षिकीं हित्वा तितीर्षन्ति भवार्णम् (भा. १०.२५.४) इत्यादिश्रुतिस्मृतिभ्यः॥ ३०॥

स्यादेतत्।

योगास्त्रयो मया प्रोक्ता नृणां श्रेयो विधित्सया।
ज्ञानं कर्म च भक्तिश्च नोपायोऽन्योऽस्ति कर्हिचित्॥ इति (भा. ११.२०.६)

भगवता त्रिकं निःश्रेयसहेतुरित्युक्तम्। विद्यैव तद्धेतुरिति कथमिति चेत्। उच्यते कर्मणः साक्षात्तद्धेतुत्वं नास्ति पूर्वोक्तश्रुत्यादिभ्यः किन्तु चित्तशुद्धिद्वारा तदुभयाङ्गतैव तमेतं वेदानुवचनेन ब्रह्मणा विविदिषन्ति यज्ञेन दानेन तपसानाशकेन (बृ. उ., ४.४.२२) इत्यादिश्रुतेः

यथेच्छावासनिरताः सर्वबाधविवर्जिताः।
शुद्धान्तःकरणाः शुद्धाः कर्मानुष्ठाननिर्मलाः॥
शुद्धे च तासां मनसि शुद्धेऽन्तःस्थिते हरौ।
शुद्धज्ञानं प्रपश्यन्ति विष्णवाख्यं येन तत्पदम् (वि. पु.) इत्यादिस्मृतेश्च।

किन्तु ज्ञानभक्त्योरेव साक्षात्तद्धेतुत्वम्॥ ३१॥

भक्तिरपि ज्ञानविशेषो भवतीति ज्ञानत्वसामान्यात्तमेवेति विद्यैवेति व्यपदेशः। जातिं पुरस्कृत्य बहुष्वैक्यं व्यपदिश्यते। यदाह भरतः रसादीनामनन्तत्वाद्भेद एको हि गण्यते इति। विवृतं चैतत्। असंलक्ष्यक्रमत्वं जातिमादाय रसादिरेक एव गण्यते। अन्यथा तद्गणनमशक्यं प्रत्येकं भेदबाहुल्यादिति। ज्ञानविशेषे भक्तिशब्दस्य प्रयोगः कौरवविशेषे

पाण्डवशब्दवद्बोध्यः॥ ३२॥

अयमत्र निष्कर्षः। विद्यावेदनपर्यायं ज्ञानं द्विविधं। एकं निर्णिमेषवीक्षणवत्तत्त्वंपदार्थानुभवरूपं द्वितीयं त्वपाङ्गवीक्षणवद्विचित्रं भक्तिरूपमिति। तत्र शुद्धत्वंपदार्थानुसन्धिनाऽस्य जीवस्य तत्पदभाजोऽपि पतित्यक्तपत्नीवद्भगवत्प्रसादसौभाग्यहीनस्य कैवल्यलक्षणो मोक्षः स्यात्,

आत्मानं चेद्विजानीयादयमस्मीति पूरुषः।
किमिच्छन् कस्य कामाय शरीरमनुसंज्वरेत्॥ (बृ. उ., ४.४.१२) इत्यादिश्रुतेः॥ ३३॥

तत्पदार्थपरिशुद्धिविज्ञानात्त्वमात्यसैन्याधिपादिवद्यथायथं तत्प्रसादसौभाग्यभाजनस्य तस्य सालोक्यादिलक्षणा मुक्तिर्भवति। एतद्वै सत्यकाम परं चापरं ब्रह्म यदोङ्कार इत्युपक्रम्य यः पुनरेतं त्रिमात्रेणौमित्यनेनैवाक्षरेण परं पुरुषमभिध्याईत स तेजसि सूर्ये सम्पन्नो यथा पादोदरस्त्वचा विनिर्मुच्यते एवं हैव स पाप्मभिर्विनिर्मुक्तः स सामभिरुन्नीयते ब्रह्मलोकं स एतस्माज्जीवघनात्परात्परं पुरिशयं पुरुषमीक्षते इति श्रवणात्। शास्त्रीयज्ञानं त्वत्र परत्र च द्वारभूतं स्वीकार्यमितरथा प्रवृत्त्यनुपपत्तेः॥ ३४॥

भक्तिरूपेण तु ज्ञानविशेषेण स्नेहसौन्दर्यादिगुणाञ्चितयुवतिरत्नवद्भवगद्वशीकारप्रसादपात्रस्य तदङ्घ्रिवरिवस्यानन्दलक्षणः पुरुषार्थो भवति। भक्तिरेवैनं नयते भक्तिरेवैनं दर्शयति भक्तिवशः पुरुषो भक्तिरेव भूयसीति (माठर-श्रुति, ) विज्ञानघनानन्दघना सच्चिदानन्दैकरसे भक्तियोगे तिष्ठतीति (गोपालतापिनी उ., ) च श्रुतेः,

अहं भक्तपराधीनो ह्यस्वतन्त्र इव द्विज।
साधुभिर्ग्रस्तहृदयो भक्तैर्भक्तजनप्रियः॥
मयि निर्बद्धहृदयाः साधवः समदर्शिनः।
वशे कुर्वन्ति मां भक्त्या सत्स्त्रियः सत्पतिं यथा॥ (भा., ९.४.६३, ६६) इत्यादिस्मृतेश्च॥ ३५॥

सालोक्यादेस्तु नेहाभिलाषः स्वतः सम्भवात्

मत्सेवया प्रतीतं ते सालोक्यादिचतुष्टयम्।
नेच्छन्ति सेवया पूर्णाः कुतोऽन्यत्कालविप्लुतम्॥ (भा., ९.४.६७) इति स्मृतेः।

भक्तिलक्षणेऽप्येवं पठ्यते भक्तिरस्य भजनम्। तदिहामुत्रोपाधिनैरस्येनामुष्मिन् मनःकल्पनमेतदेव नैष्कर्म्यमित्यथर्वशिरसि (गो. ता. उ.)

सर्वविधिविनिर्मुक्तं तत्परत्वेन निर्मलम्।

हृषीकेण हृषीकेशसेवनं भक्तिरुच्यते॥ इति नारदपञ्चरात्रे च॥ ३६॥

एवं च यथाक्रतुरस्मिंल्लोके पुरुषो भवति तथेतः प्रेत्य भवति,

ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहम् (भ. गी., ),

नायं सुखापो भगवान् देहिनां गोपिकासुतः।
ज्ञानिनां चात्मभूतानां यथा भक्तिमतामिह॥ (भा. १०.९.२१) इत्यादीनि फलतारतम्यवाक्यानि सङ्गच्छेरन्निति॥ ३७॥

अत्रैवं पुनश्चिन्त्यते भगवद्वशीकारहेतुभूता शक्तिः किं स्वरूपेति किं प्राकृतसत्त्वमयज्ञानानन्दरूपा किं वा भगवत्स्वरूपज्ञानानन्दरूपा अथवा जैवज्ञानानन्दरूपा उत ह्लादिनीसारसमवेतसंवित्साररूपेति। नाद्यः भगवतो मायावश्यत्वाश्रवणात् स्वतः पूर्णत्वाच्च। न द्वितीयोऽतिशयासिद्धेः। नापि तृतीयो जैवयोस्तयोः क्षोदिष्ठत्वात्। किन्तु चतुर्थ एवासौ भवेत्॥ ३८॥

भक्तौ खलु भगवान् स्वयमेव वशीभूतस्तिष्ठति तामरसकोशे मधुप इव रसिकयुवत्यां रसिकयुवेवेति श्रुतिस्मृतिभ्यः प्रतीयते। तत्प्रतीतार्थान्यथानुपपत्तिप्रसूतयार्थापत्त्या तु

ह्लादिनीसन्धिनीसंवित्त्वय्येका सर्वसंश्रये।
ह्लादतापकरी मिश्रा त्वयि नो गुणवर्जिते॥ इति

श्रिविष्णुपुराणोक्तस्वरूपविशेषभूतह्लादिनीसंवित्साररूपा सेति निश्चीयते॥ ३९॥

तथाच ह्लादसंविदोः सारो भक्तिरिति सिध्यति। तत्सारत्वं च तन्नित्यपरिकराश्रयकतदानुकूल्याभिलाषविशेषः। इथम्भूता भक्तिरित्यभिप्रायेणैव सच्चिदानन्दैकरसतया तां विशिनष्टि श्रुतिस्तस्या भगवद्वश्यतां च दर्शयति 'विज्ञानघना' इत्यादिना 'भक्तिरेवैनं नयति' इत्यादिना॥ ४०॥

ननु ह्लादिन्यादिरूपा सा भक्तिर्भगवत्स्वरूपभूताज्ज्ञानानन्दान्नातिरिच्यते यदसौ स्वरूपशक्तिरिति भवद्भिरेवोक्तम्। कथमधुना भगवत्स्वरूपज्ञानानन्दत्वं भक्तेः प्रत्याख्यायत इति चेत्। अत्राचक्ष्महे न खलु पराभ्युपगतनिर्विशेषचैतन्यमात्रवद् ब्रह्मस्वरूपं स्वीकुर्महे किन्तु स्वरूपशक्तिमदेव, शक्तिश्च स्वरूपानतिरेकिण्यपि तद्विशेषतयावभासते, अन्यथा तस्य शक्तिरिति व्यपदेशासिद्धेः॥ ४१॥

अवयवावयविभाववदेष प्रत्ययः यथा करचरणाद्यवयविनः कराद्यवयवानामनतिरेकेऽपि तदभावप्रतीतिर्वैदुषी तथैतद्द्रष्टव्यम्। न ह्येषा निर्मूला कल्पना 'नेह नानास्ति

किञ्चन' इत्यादिश्रुतिस्मृतिभ्यः 'प्रतिषेधाच्च' (ब्र. सू.) इति न्यायाच्च। तथा च वर्तुलत्वकोमलत्वादिविशिष्टो यूनो भुजो यथा युवत्याः स्कन्धे निहितस्तयोः परमानन्दाय सम्पद्यते तथा भगवत्स्वरूपविशेषभूतह्लादिन्यादिसारात्मा भक्तिर्भगवत्यपृथग्विशेषणतया भक्ते च पृथ्विशेषणतया सिद्धा तयोरानन्दातिशयाय भवतीति सर्वं निरवद्यम्॥ ४२॥

अत्र सन्धिनीसंविद्ध्लादिन्यो यथोत्तरमुत्कृष्टा ज्ञेयाः। तत्र सदात्मापि यया सत्तां धत्ते ददाति च सा सर्वदेशकालद्रव्यव्याप्तिहेतुः: सन्धिनी, संविदात्मापि यया संवेत्ति संवेदयति च सा संवित्, ह्लादात्मापि यया ह्लादते ह्लादयति च सा ह्लादिनीति तत्तत्प्राधान्येन स्फूर्तेस्तत्तद्रूपता तस्या एकस्या वैदूर्यवदवसीयते॥ ४३॥

सा तदुभयसारांशरूपा रतिप्रेमाख्या भक्तिर्भक्ते भगवति चात्मानं निक्षिप्य मिथस्तावनुरञ्जयति। यदुक्तम्

साधवो हृदयं मह्यं साधूनां हृदयं त्वहम्।
मदन्यन्नैव जानन्ति नाहं तेभ्यो मनागपि॥ (भा., ९.४.६८) इति,

विसृजति हृदयं न यस्य साक्षाद्-
धरिरवशाभिहितोऽप्यघौघनाशः।
प्रणयवशनया धृताङ्घ्रिपद्मः
स भवति भागवतप्रधान उक्तः॥ (भा., ११.२.५५) इति च

भक्तेषु भगवद्भक्तिश्च दर्शिता

एवं स्वभक्तयो राजन् भगवान् भक्तभक्तिमान्।
उषित्वादिश्य सन्मार्गं पुनर्द्वारवतीमगात्॥ (भा., १०.८६.५९) इत्यादौ॥ ४४॥

अतएव भक्तानन्दाय तस्य विविधः प्रयत्नोऽपि

मुहूर्तेनापि संहर्तुं शक्तो यद्यपि दानवान्।
मद्भक्तानां विनोदार्थं करोमि विविधाः क्रियाः॥
दर्शनध्यानसंस्पर्शैः मत्स्यकूर्मविहङ्गमाः।
स्वान्यपत्यानि पुष्णान्ति तथाहमपि पद्मज॥ (पद्म पुराण) इति तदुक्तेः॥ ४५॥

तस्मात्परमानन्दमयोऽपि ययानन्दातिशयी भवति स्वरूपानन्दं चानुभवति तं तमनुभावयति च भक्तान्। तस्याः सत्त्वमयानन्दादिरूपत्वं कथमिति परमपुमर्थरूपत्वं भक्तेः सिद्धम्। ज्ञानफलं भगवान् भक्तिफलं तु भक्तिरेव तद्विषया तस्या एवोदग्रानन्दत्वात्॥

४६ ॥

आनन्दादिरूपायास्तस्याः कायादितादात्म्येनाविर्भूतायाः क्रियाकारत्वमानन्दचिन्मूर्तेः कुन्तलादिप्रतीकत्ववदवसेयम्। कुपितपित्तेन सितामाधुर्यमिवाविच्छिन्नसंसारेण तदादिरूपत्वं तस्याः पूर्वं नानुभूयते तत्संसेवया तु क्रमेण तथात्वमनुभूयत इति॥ ४७॥

अतएव सिद्धानां तस्या प्रवृत्त्यनुपरम इत्याह भगवान् सूत्रकारः 'आप्रायणात् तत्रापि हि दृष्टम्' (ब्र. सू., ४.१.१२) इति। न चैव भक्तिपुरुषार्थवादिनां भगवत्पुरुषार्थताविगमः तस्यास्तदविनाभावेन तथैव तस्यापि प्राप्तेः। तथा च भक्तिमतां भक्तिविषयो भगवान् पुरुषार्थ इति निष्कृष्टमिति॥ ४८॥

तस्मात्कर्मणाश्चित्तशुद्धावुपयोगः ज्ञानभक्तिरूपाया विद्यायास्तु साक्षात्तत्प्राप्ताविति न काचिद्विक्षतिः॥ ४९॥

ये तु केचित् सद्विशेषप्रसङ्गादारम्भत एव भक्तिप्राप्तास्ते पुनर्भक्त्यैव चित्तशुद्धिं तत्साक्षात्कृतिं च भजन्ते,

पिबन्ति ये भगवत आत्मनः सतां कथामृतं श्रवणपुटेषु सम्भृतम्।
पुनन्ति ते विषयविदूषिताशयं व्रजन्ति तच्चरणसरोरुहान्तिकम्॥ (भा., २.२.३७) इत्यादिश्रवणात्।

एतानुद्दिश्य श्रुतिराह 'तपसा ब्रह्मचर्येण शुद्धया विद्ययात्मानमन्विषेत्' (प्रश्न उ., १.१०) इति॥ ५०॥